दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् अधिकज्येष्ठकृष्णाष्टमी
ज्येष्ठ 25 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-226 | 1 | जून 08, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचले नीलक्रान्तिः १५५३ युनः प्राप्तवन्तः जीविकायाः स्वजीविकायाः च अवसरान्- मुख्यमंत्री

3 सनातनसंस्कृति-सामाजिकसेवयोः सङ्गमस्थलम् अभवत् घुग्घर-कालीबाडी-महोत्सवः

5 शुक्र-बृहस्पति-चन्द्राणां गोचरेण निर्मितः गजकेसरी-राजयोग-गजलक्ष्मीयोगाः

## सी. बी. एस्. ई. गतदिने रात्रौ द्वादशी कक्षायाः पुनर्मूल्याङ्कन-आवेदन-वेबफलकमं समापयिष्यति

द्वादशीकक्षायाः परीक्षा परिणामस्य प्रकाशनानन्तरं सम्बन्धितविषयाणां परीक्षणाय उत्तरपुस्तिकानां पुनर्मूल्याङ्कनाय च अन्तर्जालीय-माध्यमेन-आवेदनपत्राणां प्रेषणस्य गतदिने अन्तिमातिथिः अस्ति । केन्द्रीय माध्यमिक शिक्षा परिषद् सामाजिकमाध्यमेषु प्रकाशिते एकस्मिन् सन्देशे उक्तवान् यत् वेबफलकम् मध्यरात्रिपर्यन्तं उद्घाटितः भविष्यति। परिषदा छात्रेभ्यः अनुरोधः कृतः यत् ते अन्तिमतिथेः पूर्वमेव स्व आवेदनपत्राणि पूरयित्वा प्रेषयेयुः । प्रधानमन्त्री-सलीमः

## राष्ट्रियपुरस्कारविजेता मलयाळम्-अभिनेता

### सलीमकुमारः कोच्चि-नगरे दिवङ्गतः

राष्ट्रियपुरस्कारविजेता मलयाळम्-चलचित्राभिनेता सलीम कुमारः ह्यः कोच्चि-नगरे दिवङ्गतः। तस्य एकस्मिन् निजी चिकित्सालये उपचारः प्रचलति स्म। सः सप्तपञ्चाशत् वर्षीयः आसीत्। श्रीकुमारः गतरात्रौ प्रायः पादोन एकादशवादने दिवङ्गतः। प्रारम्भे दूरदर्शन-हास्य-कार्यक्रमेण अवधानं प्राप्तः श्रीसलीमकुमारः षण्णवत्यधिक ऊनविंशतिशततमे वर्षे सिद्दीकी शमीर इत्यनेन निर्दिष्टे 'इष्टमानु नूरुवट्ट' इति चलच्चित्रस्य माध्यमेन चलच्चित्र-जगति प्रविष्टवान्। प्रधानमन्त्रिणा नरेन्द्रमोदिना अभिनेतुः सलीमकुमारस्य निधने दुःखं प्रकटितम्।

## भारत-ऋतु-विभागेन सम्पूर्ण देशे तीव्रवृष्टेः पूर्वानुमानं प्रकटितम्,

भारत-ऋतु-विभागेन दक्षिणपश्चिम-प्रावृट्कालस्य आगमनेन अग्रिमे द्वि-त्रिषु दिनेषु सम्पूर्ण देशे तीव्रवृष्टेः पूर्वानुमानं प्रकटितम्, उत्तरमध्यभारतस्य केषुचित् भागेषु उष्णतरङ्गस्य स्थितिः अपि अनुवर्तते। एतदतिरिच्य, आगामिषु चतुर्षु दिनेषु दिल्ली, पञ्जाब, हरियाणा, चण्डीगढ, पश्चिमराजस्थानम्, तटीय-आन्ध्रप्रदेश, इत्येतेषु प्रदेशेषु उष्णतरङ्गस्य स्थितिः भविष्यति इति ऋतु-विभागेन पूर्वानुमानितम्। उत्तरपश्चिमभारते, मध्यभारते च आगामिषु त्रिषु दिनेषु अधिकतमं तापमानं द्वितः षट् डिग्री सेल्सियस् पर्यन्तं भवितुं शक्नोति ।

## नवदेहल्यां भारत-इण्डोनेशिया-देशयोः संयुक्त-आयोगस्य उपवेशनं संपन्नम्; द्वैपाक्षिक-वार्तायां उभौ पक्षौ सामरिकसहभागित्वं सुदृढीकरणाय सहमतौ अभवताम्



भारत-इण्डोनेशिया-देशयोः संयुक्तायोगस्य उपवेशनम् नवदेहली-नगरे सम्पन्नम्। विदेशमन्त्री डॉ. एस. जयशंकर तथा तस्य इण्डोनेशियादेशीयः समकक्षीयः सुगिओनो इत्येषः च उपवेशनस्यास्य सहाध्यक्षतां कृतवन्तौ । सामाजिकमाध्यमे प्रकाशिते सन्देशे डॉ. जयशंकरः उक्तवान् यत् विगतेषु वर्षेषु उभयोः देशयोः मध्ये व्यापकरणनीतिक-सहभागिता सुदृढाऽभवत्। तेन उक्तं यत् राजनैतिक, रक्षा-सुरक्षा, सामुद्रिक-नौवहन वाणिज्य, वित्तीय-प्रौद्योगिकी स्वास्थ्य-, औषधनिर्माण, उर्वरक, महत्त्वपूर्णखनिज-क्षेत्रेषु तथा पर्यटन, शिक्षण एवं सांस्कृतिक-सहयोगादिषु विषयेषु महत्त्वपूर्णा चर्चा अभवत्। उभौ नेतारौ क्षेत्रीय-घटनाक्रमान्, बहुपक्षीय-समन्वयस्य संवर्धनम्, तथा भारत-आसियान-सम्बन्धानां सुदृढीकरणे अपि स्वविचाराणां आदान-प्रदानम् अकुरुताम्। इतः पूर्वम् उद्घाटनभाषणे डॉ. जयशंकरः अवदत् यत् उभयोः देशयोः मध्ये संयुक्तायोगस्य उपवेशनमिदं चतुर्वर्षानंतरं आयोजितम् अस्ति। एतत् स्वीकरणीयं यत् अस्मिन् समये द्विपक्षीयसम्बन्धेषु महत्त्वपूर्णा प्रगतिः अभवत् । तेन अग्रे उक्तं यत् गतवर्षे भारत-इण्डोनेशियादेशौ उभौ राजनयिकसम्बन्धानां स्थापनायाः पञ्चसप्ततिवर्षाणां पूर्तेः उत्सवं सम्यक् आचरितवन्तौ।

## गृहमन्त्रिणा अमितशाहेन अन्ताराष्ट्रियसीमायां वित्तीयसम्पत्ति-व्यवहारेषु सूक्ष्मनिरीक्षणाय आहूतम्



गृहमन्त्री अमितशाहः अन्तर्राष्ट्रीयसीमासु वित्तीयव्यवहाराणां, भवननिर्माणस्य तथा सम्पत्तिनां च क्रयणस्य विक्रयणस्य च विषये कठोर पर्यवेक्षणस्य पालनम् आहूतवान्। एषः निर्देशः तेन बीएसएफ-त्रिपुरासीमामुख्यालये पूर्वोत्तरराज्यस्य सीमवर्तीक्षेत्राणां सम्बन्धे आयोजितायां सभायां प्रदत्तः। गृहमन्त्री गतपञ्चवर्षाणां भूमिलेखानां परीक्षणं कारयितुमपि निर्दिष्टवान् । श्रीशाहः उक्तवान् यत् सीमवर्तीजनपदेषु वित्तीयानुशासनस्य सुनिश्चितीकरणं राज्यसर्वकाराणां दायित्वम् अस्ति। उपवेशने अस्य विषयस्य उपरि विशेषतया बलं दत्तम् यत् नरेन्द्र मोदिनः नेतृत्वे केन्द्र प्रशासनम् अन्तर्राष्ट्रीयसीमासु उच्चतमस्तरस्य सुरक्षां सुनिश्चेतुं दृढसंकल्पितम् अस्ति । तथा च सीमवर्तिक्षेत्राणां समग्रविकासाय सुरक्षायै च केन्द्रीय-राज्यविभागानां मध्ये सुदृढसमन्वयस्य संवर्धनं करोति । अस्मिन् उपवेशने माणिक शाहः, मुख्यसचिवःजे के सिन्हा, अन्ये च वरिष्ठाधिकारीणः उपस्थिताः आसन्। तथैव सीमवर्तिषु सर्वेषाम् अष्ट-जनपदानां जनपदाधिकारीणः आरक्षि अधीक्षकाः च अपि उपस्थिताः आसन् ।

## अमेरिका-ईरानदेशयोः मध्ये संघर्षस्य शतदिनानि जातानि

अमेरिका-ईरानदेशयोः मध्ये संघर्षस्य शतदिनानि जातानि । फरवरी-मासस्य अन्ते ईरानदेशे अमेरिका-इज़रायलदेशाभ्यां कृतैः आक्रमणैः आरब्धः अयं संघर्षः अधुना विस्तृत-क्षेत्रीय-संकटे परिणतः जातः। अस्मात् संघर्षात् होर्मुज-जलसंधिमध्ये सुरक्षित-समुद्रयान-परिवहनाय संकटम् उत्पन्नम् । अधुना लेबनानदेशे पुनः संघर्षयुता स्थितिः उत्पन्ना जाता ।

## सुभाषितम्

**सुवर्णपुष्पां पृथिवीं,**
**चिन्वन्ति पुरुषास्त्रयः।**
**शूरश्च कृतविद्यश्च,**
**यस्य जानाति सेवितुम्।।**

शूरवीर, विद्वान तथा अपने जीवन का पूरा आनन्द उठाने में समर्थ, इन तीन प्रकार के व्यक्तियों के लिए ही यह पृथिवी एक सोने से बने हुए और मूल्यवान सुवर्णपुष्प के समान आकर्षक और आनन्ददायक है।

हिमसंस्कृतवार्ता
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
ग्रामः कोटला तहसीलपरिसरस्य समुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यावहारसङ्केतः-१७७१११
सञ्चालिका- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## तेलुगुदेशम् पार्टी इति दलेन राज्यसभानिर्वाचनाय स्वकीयस्य दलस्य त्रयः प्रत्याशिनः घोषिताः



हिमसंस्कृतवार्ता। तेलुगुदेशम् पार्टी इति दलस्य राष्ट्रीयाध्यक्षेण एन चंद्रबाबू नायडू वर्येण आगामि जून-मासस्य अष्टादशे दिनाङ्के राज्यसभानिर्वाचनाय स्वकीयस्य दलस्य त्रयः प्रत्याशिनः घोषिताः। तेषु उद्योगपतिः सना सतीशः, शिक्षाविद् भाष्यम् रामकृष्णः तथा टीडीपी-सामाजिक-माध्यम-प्रकोष्ठस्य प्रमुखः चिन्तकयाल विजयः च सन्ति ।

# हिमाचले नीलक्रान्तिः १५५३ युनः प्राप्तवन्तः जीविकायाः स्वजीविकायाः च अवसरान्- मुख्यमंत्री



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खु-महोदयस्य दूरदर्शिनि नेतृत्वे हिमाचलप्रदेशस्य मत्स्यक्षेत्रम् अभूतपूर्वायां प्रगतौ अस्ति। पूर्वं सीमित- आर्थिक- गतिविधिरूपेण वीक्षितं एतत् क्षेत्रम् अद्य ग्रामीणविकासस्य, जीविकासृजनस्य, आर्थिकसमृद्धेः च सुदृढं माध्यमं संजातम्। राज्यसर्वकारस्य प्रगतिशीलाभिः नीतिभिः, आधुनिकतकनीक-माध्यमेन, धीवराणां कल्याणेन च मत्स्यक्षेत्राय नवीना प्रतिष्ठा प्राप्ता। प्रदेशसर्वकारेण मत्स्योत्पादनस्य वर्धनेन साकं धीवराणां मत्स्यपालकानां च आये वृद्धिः, आधुनिक- आधारभूतसंरचनायाः विकासः, सामाजिकसुरक्षा च प्राथम्येन स्वीकृता, येन कारणेन हिमाचलप्रदेशस्य 'ब्लू इकोनॉमी' अर्थात् नील-अर्थव्यवस्था इत्यस्याः निरन्तरं विस्तारः जायमानः अस्ति।

### सर्वकारीययोजनाभिः ६०,७९९ मीट्रिक-टनमितं मत्स्योत्पादनम्, मूल्यं ९७२ कोटिरूप्यकाणि

राज्यसर्वकारस्य योजनानां फलस्वरूपं जनवरी २०२३तः मार्च २०२६ पर्यन्तं प्रदेशे आहत्य ६०,७९९.६६ मीट्रिकटनमितं मत्स्योत्पादनं सञ्जातम्, यस्य अनुमानितं मूल्यं ९७२.४६ कोटिरूप्यकाणि आसीत्। वर्ष २०२३-२४ मध्ये यत्र १७,७२१.६४ मीट्रिक-टनमितं मत्स्योत्पादनं विहितं, तत्रैव २०२४-२५ मध्ये एतत् वर्धित्वा १९,०१९.८३ मीट्रिक-टनं, २०२५-२६ मध्ये कीर्तिमानं स्थापयित्वा २०,००५.९७ मीट्रिक-टनमितं उत्पादनम् अभवत्। एषा निरन्तरा वृद्धिः दर्शयति यत् मत्स्यक्षेत्रं प्रदेशस्य अर्थव्यवस्थायां प्रमुखं योगदानं ददाति, सहस्रशः परिवाराणाम् आयस्य च स्थायी स्रोतः अभवत्।

### १५५३ युनः प्राप्तवन्तः आजीविकायाः अवसरान्; आधुनिकी पद्धतिः बलं ददाति

वर्तमाने मत्स्यक्षेत्रं जीविकायाः उद्यमितायाश्च प्रमुखाधारः संजातः। वर्ष २०२३ तः अधुना यावत् विभिन्न- मत्स्यविकासयोजनानां माध्यमेन आहत्य १५५३ आजीविकावसराः सृष्टाः। वर्ष २०२३-२४ मध्ये ३८५, २०२४-२५ मध्ये ५३९, २०२५-२६ मध्ये युवभ्यः रोजगार-स्वरोजगारयोः ६१२ अवसराः प्रदत्ताः सन्ति। 'बायोफ्लॉक' तकनीक, रीसर्कुलेटरी एक्वाकल्चर सिस्टम (RAS), तडाग- आधारित- मत्स्यपालनं, 'ट्रौट फार्मिंग' सदृशाः आधुनिकाः पद्धतयः ग्रामीणयुवभ्यः स्वरोजगारस्य नवीनानि द्वाराणि उद्घाटितवत्यः। हैचरी, मत्स्यबीजोत्पादनं, 'फीड मिल' (मत्स्य-आहार- तन्त्रं) मत्स्यविपणनाय हिमसञ्चायिका-युक्तानां द्विचक्रिकाणां त्रिचक्रिकाणां च उपरि प्रदीयमानेन अनुदानेन (सब्सिडी) मत्स्यक्षेत्रं सुदृढं संजातम्।

### निजी-मत्स्यपालकैः ३३३ कोटि-रूप्यकाणां 'ट्रौट' मत्स्यस्य उत्पादनं कृतम्

जनवरी २०२३तः मार्च २०२६ अवधौ विभागीय-ट्रौट- क्षेत्रैः २३५.१६ लक्षरूप्यकाणां ४२.२९ मीट्रिक- टनमितं ट्रौटमत्स्यस्य उत्पादनं विहितम्। विभागेन विभिन्नाभिः गतिविधिभिः ३३८.१६ लक्षरूप्यकाणां राजस्वं सङ्गृहीतम्। अस्मिन् काले निजी- ट्रौट- कृषकैः प्रायः ३३३.४० कोटिरूप्यकाणां ५,०००.८७ मीट्रिकटनमितं ट्रौट- उत्पादनं कृतम्। सर्वकारेण कुल्लू-जनपदस्य 'पतलीकूहल' क्षेत्रे स्थापितायाः 'कोल्ड वाटर आर.ए.एस. प्रणाल्याः' सञ्चालनं क्रियते, येन ट्रौट- उत्पादनप्रक्रिया सुगमा अभवत्। अस्याः तन्त्रायाः प्रयोगात् ट्रौट-मत्स्यस्य सञ्जीवनसमयः १४ मासात् न्यूनीभूत्वा १० मासाः एव अवशिष्टः। एकस्याम् अन्यायाम् उपलब्धौ वर्ष २०२५-२६ अवधौ हिमाचलस्य मत्स्यपालकैः उत्तराखण्डस्य कृते २.५ लक्षमितं 'आइड ओवा' तथा ८.५ लक्षमितं 'रेनबो ट्रौट फ्राई' (मत्स्यशावकाः) गुणवत्तापूर्ण- मत्स्यबीज-उत्पादनक्षमतां प्रदर्शयति।

# न्यायालय- परिसरस्य प्रतिबन्धितमार्गाणां विवादाय उच्चस्तरीयसमित्याः सङ्घटनम्, महाधिवक्ता अनूप रत्नः भविष्यति अध्यक्षः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशसर्वकारेण शिमलास्थिते उच्च- न्यायालयस्य (हाईकोर्ट) जनपद- न्यायालय-परिसरस्य च प्रति गच्छतां सील-कृतानां प्रतिबन्धितानां च मार्गाणां सन्दर्भे उत्थितस्य विवादस्य समाधानाय एका उच्चस्तरीयसमितिः सङ्घटिता। गृहविभागेन प्रसारितायाः अधिसूचनायाः अनुसारं समितिः सद्यःप्रभावेण कार्यं करिष्यति तथा च सप्तदिनानाम् अन्तरे स्वकीयं विवरणं (रिपोर्ट) सर्वकाराय समर्पयिष्यति।अस्याः समित्याः अध्यक्षता हिमाचलप्रदेशस्य महाधिवक्ता अनूपरत्नमहोदयः करिष्यति। एतदतिरिच्य समित्यां 'हाईकोर्ट बार एसोसिएशन' इत्यस्य अध्यक्षः हमेंदरसिंहचन्देलः, पूर्वमहाधिवक्तारौ श्रवणडोगरा, अशोकशर्मा तथा च बार-काउन्सिल इत्यस्य निर्वाचितसदस्यः सञ्जीवभूषणः सदस्यरूपेण सम्मीलिताः सन्ति।

सर्वकारस्य पक्षतः निर्गतायाम् अधिसूचनायां प्रतिपादितं यत् एषा समितिः न्यायालयपरिसरं यावत् अधिवक्तॄणां सुगमप्राप्तये सीलप्रतिबन्धित- मार्गाणां विषयाणाम् अध्ययनं करिष्यति। अनेन साकमेव सम्बद्धविभागैः, अधिकारिभिः, अन्यहितधारकैः च सह विचारविमर्शं कृत्वा स्थायि- व्यावहारिकसमाधानाय संस्तुतिः प्रदास्यति। समित्याः संयोजकरूपेण सामान्यप्रशासनविभागस्य सचिवः आशीषसिंहमारः नियुक्तः कृतः अस्ति। एतदतिरिक्तं पुलिसमुख्यालयस्य डी.आई.जी. (लॉ एंड ऑर्डर), उपायुक्तः शिमला, आरक्षाधीक्षकः (SP) शिमला च अस्याम् समित्यां सदस्याः कृताः सन्ति। अधिसूचनानुसारं गृहविभागः समित्यै आवश्यका सचिवीया तथा च समन्वयगता साहाय्यम् उपकल्पयिष्यति। सर्वकाराय एषा आशा वर्तते यत् समित्याः संस्तुतिभिः न्यायालयं प्रति गमनविवादस्य कश्चित् व्यावहारिकः मार्गः अवश्यमेव उपलप्स्यते।

# केन्द्रीय-युवकार्याणां क्रीडामन्त्री डॉ. मनसुख-माण्डविया "फिट् इण्डिया सण्डेज् ऑन् साइकिल्" इति अभियानस्य सप्तसप्ततितमे संस्करणे सहभागित्वं कृतवान्



केन्द्रीय-युवकार्याणां क्रीडामन्त्री डॉ. मनसुख-माण्डविया गतदिने प्रातःकाले नव-दिल्ली-नगरे आयोजितस्य "फिट् इण्डिया सण्डेज् ऑन् साइकिल्" इति अभियानस्य सप्तसप्ततितमे संस्करणे सहभागित्वं कृतवान्। वार्ताहरैः सह वार्तालापं कुर्वन् असौ अवदत् यत् साइकिल इति द्विचक्रिका-यानस्य संचालनात् पृथिवी स्वच्छा भवति तथा च यातायात-सम्बद्धस्य अवरोधस्य गम्भीरसमस्यायाः समाधानम् अपि प्राप्यते । अभिनेता विक्रान्त-मैसी अपि "फिट् इण्डिया सण्डेज् ऑन् साइकिल्" इति कार्यक्रमे सम्मिलितवान् एतदभियानम् अद्वितीयम् इति वर्णितवान्। सः अवदत् यत् एषः उपक्रमः अधुना जनान्दोलनरूपं धारयति ।

# विश्वखाद्यसुरक्षा दिवसः

गतदिने विश्व खाद्य सुरक्षा दिवसः आचरितः । अस्य वर्षस्य विश्व-खाद्य-सुरक्षा-दिवसस्य विषयः आसीत् - "समाह्वानात् समाधानपर्यन्तम्- सर्वत्र सुरक्षितं भोजनम्।" अयं दिवसः खाद्यसुरक्षायाः अधिकाररूपेण तथा सामूहिक-दायित्वरूपेण जागरूकतां वर्धयितुं सशक्तम् अवसरं प्रददाति। स्वास्थ्य-परिवार-कल्याणमन्त्री जगत प्रकाश नड्डा स्वस्थ-भविष्याय सुरक्षित-स्वच्छ-भोजनाय च भारत प्राशासनिक प्रतिबद्धतां पुनरुच्चारितवान् । अस्मिन् अवसरे असौ सामाजिक-माध्यमेषु प्रकाशिते सन्देशे उत्तमं आहारं स्वीकर्तुं तथा च आत्मनिर्भर भारतस्य निर्माणे योगदानं दातुम् जनेभ्यः आहूतवान् ।



# सनातनसंस्कृति-सामाजिकसेवयोः सङ्गमस्थलम् अभवत् घुग्घर-कालीबाडी-महोत्सवः



**हिमसंस्कृतवार्ता, रजनीश अवस्थी पालमपुरम्।**

भारतीय जन सेवा संस्था इत्यस्याः तत्त्वावधाने पालमपुरसमीपे स्थितस्य घुग्घर-कालीबाडी-मन्दिरस्य प्राङ्गणे आयोजितस्य सप्तदिवसात्मकस्य सहस्रचण्डीमहायज्ञस्य, विष्णुसहस्रनामपाठस्य, होमात्मकरुद्रीपाठस्य च भव्ये आध्यात्मिके च वातावरणे सफलतापूर्वकं समापनम् अभवत्। अस्मिन् ऐतिहासिके महानुष्ठाने क्षेत्रेण सह प्रदेशस्य विभिन्नेभ्यः भागेभ्यः समागताः सहस्रशः श्रद्धालवः सम्मिलिताः भूत्वा जनकल्याणाय विश्वकल्याणाय च कामनां कृतवन्तः। संस्थायाः अध्यक्षः अनिल गौडः अवदत् यत् इमं सप्तदिवसात्मकं धार्मिकम् आयोजनं १२१ विद्वद्भिः पण्डितैः प्रमुखाचार्यस्य श्रीबालकराममहोदयस्य मार्गदर्शने निर्देशने च सम्पन्नं कारितम्। सः अकथयत् यत् भारतीय जन सेवा संस्था समये-समये समाजकल्याणाय जनजागरणाय च सम्बद्धान् विविधान् कार्यक्रमान् आयोजयति। संस्थया मादकद्रव्याणां (नशा) दुष्प्रभावाणां प्रति जनजागरूकता-अभियानम्, वरिष्ठनागरिकसम्मानः, तिरङ्गयात्रा, योगसंस्कृतेः संवर्धनं तथा वृक्षारोपणम् इत्यादयः अनेके सामाजिकाः विषयाः निरन्तरं क्रियन्ते।

सः इदमपि सूचितवान् यत् संस्था निकटभविष्ये पालमपुरनगरे एकां डायग्नोस्टिक मेडिकल लैब (चिकित्सीय परीक्षणशालाम्) स्थापयितुं गच्छति, यत्र जनानां विविधाः चिकित्सीयपरीक्षाः केवलं न्यूनतममूल्ये उपलब्धाः भविष्यन्ति, येन सामान्याः जनाः स्वास्थ्यपरीक्षणेषु अतिरिक्तम् आर्थिकभारं वोढुं न प्राप्नुयुः। संस्थायाः सचिवः विजय शर्मा अवदत् यत् अस्मिन् विराति धार्मिकायोजने प्रायः पञ्चसहस्रं श्रद्धालवः यजमानरूपेण भागं गृहीत्वा जनकल्याणाय विश्वशान्तये च प्रार्थनां कृतवन्तः।

सः अवदत् यत् ६ दिनाङ्के कालीबाडीमन्दिरे भव्यायाः महाआरार्त्रिक्याः (महारत्याः) आयोजनम् अपि कृतम्, यस्मिन् भगवत्यै ५६ प्रकाराणां नैवेद्यानि (छप्पन भोग) अर्पितानि।

संस्थायाः कोषाध्यक्षौ शैलेन्द्र मैनी, सन्दीप शर्मा च अवदताम् यत् एतत् सम्पूर्णम् आयोजनं सर्वसामान्यजनानां सहयोगेन सर्वसामान्यजनेभ्यः एव आयोजितम् आसीत्। अस्य उद्देश्यं समाजे वैदिकपरम्पराणां संस्काराणां च सुदृढीकरणं तथा आगामिपुरुषाणाम् (भाविपीढ्याः) भारतीयसंस्कृत्या सनातनमूल्यैः च सह संलग्नीकरणम् अस्ति।

संस्थायाः कार्यकर्तारौ अनिल नागः, वीरेन्द्र शर्मा च अकथयताम् यत् संस्थायाः मूलमुद्देश्यं सनातनधर्मस्य उन्नतिः, सामाजिकसमरसतायाः संवर्धनं तथा समाजस्य प्रत्येकं वर्गं एकत्र मञ्चे आनीय एकतायाः सद्भावस्य च सन्देशप्रदानम् अस्ति।

अस्मिन् महानुष्ठाने पालमपुरस्य विधायकः आशीष बुटेलः, राज्यसभासांसदः अनुराग शर्मा, सुलह-विधानसभाक्षेत्रस्य विधायकः विपिन परमारः, पालमपुरस्य पूर्वविधायकः प्रवीण शर्मा, सतीश करवलः, अजय शर्मा, कुलपतिः जे.के. शर्मा, सञ्जीव शर्मा, अनूप शर्मा, अमन शर्मा, पूनम, सुरेशः, लता अवस्थी, अनीता शर्मा, अञ्जना शर्मा, कुमुदिनी, बिन्दु शर्मा इत्यादयः अनेके गणमान्याः महानुभावाः श्रद्धालवः च सोत्साहं भागं गृहीतवन्तः।

कार्यक्रमस्य समापनप्रसङ्गे संस्थायाः पक्षतः श्रीरजनीश अवस्थी महोदयः मुद्रण-इलेक्ट्रॉनिक-माध्यमैः (प्रिंट एवं इलेक्ट्रॉनिक मीडिया) सम्बद्धानां सर्वेषां पत्रकारबन्धूनां जनसामान्यानां च कृतज्ञतां ज्ञापयन् अवदत् यत् एतेषाम् एव सहयोगेन सहभागितया च एतत् ऐतिहासिकं सफलं च आयोजनं सम्भवम् अभवत्।

## "विनोदकणिका"

### "धन्यः पुणेनगरस्य जनाः"

पुणेनगरस्य एकः जनः स्वस्य हर्म्यात् बहिः एकं नामफलकं स्थापितवान्। "वस्त्रपात्रप्रक्षालिका आवश्यकी" इति। ये ये जनाः नामफलकं पश्यन्ति ते चिन्तयन्ति- अस्य कोऽर्थः? 🤔

अग्रिमे दिने एकः चाणाक्षः जनः हर्म्यस्य पार्श्वे अन्यं नामफलकं स्थापयित्वा अलिखित्- प्रतिवेशिनस्य नामफलकस्य अर्थं ज्ञातुम् अधः क्रमाङ्के दशः (१०) रूप्यकस्य 'डिजिटल पेमेन्ट' कुर्वन्तु, संदेशद्वारा च उत्तरं लभन्तु। ये ये जनाः रूप्यकाणि दत्तवन्तः तैः संदेशद्वारा उत्तरं प्राप्तम्- "गृहकार्यार्थं कर्मकरी आवश्यकी"

😂 🤷 🤦 😜

**डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**





# हिमाचलप्रदेशस्य २१५ महाविद्यालयेषु राष्ट्रियशिक्षानीति (NEP) अन्तर्गतं प्रवेशप्रक्रिया प्रचलति, छात्रेभ्यः नूतनाः विकल्पाः प्राप्स्यन्ति




**हिमसंस्कृतवार्ताः- शिमला।**

हिमाचलप्रदेशविश्वविद्यालयेन सम्बद्धेषु २१५ महाविद्यालयेषु नूतनशैक्षणिकसत्राय प्रवेशप्रक्रिया निरन्तरं प्रचलति। जूनमासस्य प्रथमाङ्कितः आरब्धायाम् अस्यां प्रक्रियायां प्रायः १.३ लक्षं छात्राः प्रवेशं ग्रहीष्यन्ति। अयं तावत् प्रथमः अवसरः अस्ति यत्र एतावती महती छात्रसंख्या राष्ट्रियशिक्षानीति- २०२० इत्यस्याः नूतनस्नातक- संरचनायाम् प्रवेशं प्राप्नोति। अस्यां व्यवस्थायां छात्राः नूतनान् विकल्पान् अपि प्राप्स्यन्ति। शिक्षाविभागस्यानुसारं कलाशाखायां (BA) विज्ञानशाखायां (BSc) च सर्वाधिकः प्रवेशः भविष्यति। प्रायः ७५ तः ८० सहस्रं छात्राः एतयोः संकाययोः प्रवेशं लब्धुं शक्नुवन्ति। वाणिज्यशाखायां (BCom) १० तः १२ सहस्रं, यदा तु बीसीए (BCA), बीबीए (BBA) इत्यादिषु पाठ्यक्रमेषु ८ तः १० सहस्रं छात्राणां प्रवेशस्य अनुमानम् अस्ति। बी.एड. (BEd) महाविद्यालयेषु ७ तः ८ सहस्रं छात्राः प्रवेशं ग्रहीष्यन्ति।एवमेव एलएलबी (LLB), नर्सिंग, पैरामेडिकल तथा स्नातकोत्तर (PG) पाठ्यक्रमेषु २० तः २५ सहस्रं छात्राणां प्रवेशस्य सम्भावना अस्ति।

नूतनशिक्षानीत्याः कारणात् विषयचयनप्रक्रियायां महदधिकं शिथिलत्वं (लचीलापन) आगतम्। बहुविषयक-अध्ययनेन कौशल- आधारित- पाठ्यक्रमाणां माङ्गल्यं वर्धितुं शक्नोति। प्रवेशप्रक्रियायां इदानीं छात्राणां समक्षं पाठ्यक्रमस्य शैक्षणिकमार्गस्य च चयनस्य आह्वानम् अस्ति। स्नातकस्तरे शोधसंस्कृतेः विकासाय विशेषं ध्यानं दत्तम् अस्ति। 'ऑनर्स विद रिसर्च' पाठ्यक्रमाः छात्रान् शोधपरियोजनाभिः सह योजयिष्यन्ति। एषा सुविधा आवश्यक- शैक्षणिक- मानकयुक्तेषु विषयेष्वेव उपलब्धा भविष्यति। विभागस्य विश्वासः अस्ति यत् अनेन स्नातकोत्तरशिक्षायाः आधारः सुदृढः भविष्यति। नूतनप्रावधानाः विकल्पाः च नूतनव्यवस्थायां विषयचयनं, क्रेडिट-अर्जनं, शोध- आधारितशिक्षा च सम्मिलिताः सन्ति। महाविद्यालयेषु विषयाणां पुनर्गठनं युक्तिकरणं च कृतम्। अनेन छात्रेभ्यः पूर्वेभ्यः अपि अधिकाः शैक्षिकाः विकल्पाः मिलन्तः सन्ति। ऑनर्स तथा 'ऑनर्स विद् रिसर्च' पाठ्यक्रमेभ्यः पृथक्-पृथक् मानदण्डाः निर्धारिताः। 'अकादमिक बैंक ऑफ क्रेडिट' सदृश्यः व्यवस्थाः छात्रेभ्यः शिथिलत्वं प्रदास्यन्ति।



# संस्कृतं मधुरं सदा- ४७



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

श्लोकार्थः कथं ज्ञातुं शक्यते इति विषये अत्र किञ्चित् विज्ञाप्यते। यथा, रामायणस्य कश्चन श्लोकः एवमस्ति-

**"तत्र लङ्कां समासाद्य पुरीं रावणपालिताम्।**
**ददर्श सीतां ध्यायन्तीमशोकवनिकां गताम्।।"इति।**

अस्य श्लोकस्य आदौ पदच्छेदः करणीयः। तदेवं भवति-
तत्र लङ्कां सम् आसाद्य पुरीम् रावण-पालितम्।
ददर्श सीतां ध्यायन्तीं अशोक-वनिकाम् गताम्।।
पदच्छेदानन्तरं पदपरिचयः आवश्यकः, अर्थात् कर्ता, कर्म, क्रिया, विशेषणम्, अव्ययम् इत्यादिकं पदं श्लोके किं किमस्तीति। यथा- कर्तृपदमत्र (हनुमान्) अध्याहारे अस्ति। कर्मपदम्- कां ददर्श? इति प्रश्नः आयाति अत्र। अशोकवनिकां गतां ध्यायन्तीं सीतां ददर्श इति उत्तरं भवति। अत्र इतरपदानि सीताम् इति द्वितीयान्तपदस्य विशेषणानि। अतः एतानि सर्वाणि श्लोकवाक्यस्य कर्मपदानि सन्ति। पुनः अपरः प्रश्नोऽपि अत्र आयाति- (हनुमान्) कां समासाद्य सीतां ददर्श? इति। अस्य उत्तरम्- रावणपालितां लङ्कां पुरीं समासाद्य ददर्श इति। समासाद्य इतिपदं ल्यबन्तम् इत्यतः तत्प्रयोगे द्वितीया इति। मुख्यं क्रियापदं च 'ददर्श' (लिट्- भूते) इति। अन्ते श्लोकवाक्यम् एवं सज्जीकरणीयम्-
(हनुमान्) रावणेन पालितां लङ्कापुरीं समासाद्य अशोकवनिकां गतां ध्यायन्तीं सीतां ददर्श। इत्येवं प्रकारेण श्लोकविश्लेषणं कृत्वा श्लोकस्य भावः सम्यक्तया अवगन्तुं शक्यते। अस्माकं प्राचीनग्रन्थाः प्रायशः छन्दसा लिखिताः सन्ति। तस्मात् पठनकाले यदि श्लोकार्थाः अपि सहैव अभिज्ञातुं प्रयत्यन्ते, तर्हि पठनं पूर्णतां गच्छेत्, अन्यथा केवलं पाठः हि भवति। एतदर्थं संस्कृतभाषायाः ज्ञानम् आवश्यकम्, तज्ज्ञातुम् अनुरागोऽपि आवश्यकः, साधना च आवश्यकी। कस्यचन यदि एतत्त्रयमेव भवेत्, तर्हि संस्कृतमातुः कृपया यथाकाले सः संस्कृतविद्वान् सञ्जायते, नात्र शङ्का। तस्मात् संस्कृतस्य पठनं सदैव शुद्धोच्चारणपूर्वकम् अर्थाभिज्ञानसहितञ्च कर्तव्यमिति, शुभम्।

## सर्वजीवनस्य श्रेयःशरणं तव त्विव ना हि को हि

***(जगज्जननीं भगवतीमुद्दिश्य प्रार्थनेयं वरीवर्ति)***

सर्वजीवनस्य श्रेयःशरणं
तव त्विव ना हि को हि
मा यदि त्वं मे शरणं न दत्से
जीवितुं शक्ये ना क्व हि
सर्वजीवनस्य श्रेयःशरणं
तव त्विव ना हि को हि ---- (००)
सकलाशोकसन्तापराशिः
त्वां विना को ना भविता आश्वासी
पतितेऽपि वाटे चलामि निशङ्कं
तव कृपा सदा मे हि
सर्वजीवनस्य श्रेयःशरणं
तव त्विव ना हि को हि
मा यदि त्वं मे शरणं न दत्से
जीवितुं शक्ये ना क्व हि
सर्वजीवनस्य श्रेयःशरणम् -- (०१)
अन्तरे यदा मे विलाप उदेति
झरति तदा ते नयनं रोदिति
सुखे सुखिनी मे,दुःखे दुःखिनी त्वं
हासे तवाऽऽहसामि हि
सर्वजीवनस्य श्रेयःशरणं
तव त्विव ना हि को हि ---- (०२)
सर्वे ह गास्यन्ति मम कोटिदोषान्
त्वया दत्तान् मे हि विक्रमविश्वासान्
मदन्तरे प्राज्यसम्भावनायाः
द्वारः त्वया उन्मीलिताः
सर्वजीवनस्य श्रेयःशरणं
तव त्विव ना हि को हि ---- (०३)
कोटिजन्मस्वपि ऋणं शोधयितुं
शक्नोमि न मातः त्वया यत्तु दत्तं
तव सेवाःकृत्वा यातु ए जीवनम्
अन्यत् ना हे याचामि हि
सर्वजीवनस्य श्रेयःशरणं
तव त्विव ना हि को हि
मा यदि त्वं मे शरणं न दत्से
जीवितुं शक्ये ना क्व हि
सर्वजीवनस्य श्रेयःशरणम् --- (४)

हिमसंस्कृतवार्ता
आचार्यः डा. रुरुकुमारमहापात्रः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
(मूलरचना ओडिआभाषायां विहिता मम दिवङ्गतेन पितृवर्येण श्रीपूर्णचन्द्रमहापात्रमहोदयेन)

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे भवतां स्वागतम्। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य मया एका विचित्रा वार्ता श्रुता। अमेरिकादेशे कश्चित् भारतीयः मूल्यं दृष्ट्वा चकितः जातः। तेन तत्र उत्कृष्ट-अल्पाहाररूपेण विक्रीयमाणा भिण्डिका दृष्टा। तस्याः मूल्यं प्रतिभारमानं द्विशताधिक-सप्तसहस्र-रूप्यकाणि निर्धारितम् अभूत्!
**नन्दिनी-** एतत् अतीव आश्चर्यकरम्! सा भिण्डिका स्वर्णमयी अभूत् वा? अस्तु, इतः परम् ओडिशाराज्यात् अन्या शुभा वार्ता प्राप्ता। पुर्याः श्रीमन्दिरे देवत्रयस्य परिधानार्थं 'करुणा-कौशेयस्य' उपयोगः कृतः। अहिंसात्मकेन मार्गेण एतत् कौशेयं सञ्चितं जातम्। अत्र पट्टकीटाः न हिंसिताः।
**काव्या-** अहिंसात्मकं कौशेयं तु देवपूजायै सर्वथा योग्यम् अस्ति। एतेन मम मनसि महान् सन्तोषः जनितः। इदानीं चीनदेशस्य वार्ता चर्च्यते। तत्र काचित् महिला बालकानां कृते लिखितानि कृत्रिम-बुद्धिमत्तायाः पुस्तकानि दृष्ट्वा विस्मिता जाता। सा तानि अतीव प्रशंसितवती अस्ति।
**नन्दिनी-** सत्यम्, बाल्यकालादेव विज्ञानपठनं शिशून् प्रबुद्धान् करिष्यति। एषा नीतिः मह्यम् अतीव रोचते। अस्तु, अन्तिमा वार्ता क्रीडाविषयिणी अस्ति। जलस्यान्तः चतुरङ्गक्रीडायाः विश्वप्रतिस्पर्धा आयोजिता अभूत्। तत्र श्वासं निरुध्य जलनिमग्नैः क्रीडकैः परस्परं सङ्घर्षः कृतः। तेषां धैर्यं प्रेक्षकैः श्लाघितम्।
**काव्या-** जलस्यान्तः बुद्धिक्रीडा अतीव कठिना वर्तते। क्रीडकानां तादृशं साहसं पूर्वं कदापि न श्रुतम्। अद्य बहुविधाः रोचकाः वार्ताः अस्माभिः चर्चिताः।
**नन्दिनी-** सत्यम्। इतः परं वार्ता-कार्यक्रमः समाप्तः जातः। श्वः पुनः मिलामः। धन्यवादः।

हिमसंस्कृतवार्ताः,
ईदरधीरजः,हैदराबादः

# पूर्वराष्ट्रपतिः रामनाथकोविन्दः कुल्लूं प्राप्तः; प्रशासनिकाधिकारिभिः कृतं भव्यं स्वागतम्

हिमसंस्कृतवार्ताः - कुल्लूः। भारतस्य पूर्वराष्ट्रपतिः रामनाथकोविन्दः रविवासरे कुल्लू-जनपदं प्राप्तवान्। भुन्तर-विमानास्पदे (एयरपोर्ट) कुल्लू-उपायुक्तेन अनुरागचन्द्रशर्मणा सह जनपदप्रशासनस्य वरिष्ठाधिकारिभिः तस्य भावपूर्णं स्वागतं विहितम्। अस्मिन् अवसरे अन्येऽपि गण्याः नागरिकाः उपस्थिताः आसन्। निर्धारितक्रमानुगुणं सः रविवासरे प्रातःकाले देहलीतः (दिल्ली) वायुमार्गेण भुन्तरं प्राप्तवान्, अतः परं च मार्गपरिवहनेन मनालीं प्रति प्रस्थितवान्। तस्य मनाली-स्थिते 'आनन्द वर्धन रिसॉर्ट' इत्यस्मिन् विश्रामगृहं प्रति निवाससज्जता वर्तते। ८ जून दिनाङ्के सः 'ऋषि भूमि चिकित्सा केन्द्रस्य' विधिवत् उद्घाटनं करिष्यति तथा च 'अन्ताराष्ट्रिय साधना कक्षस्य' (साधना हॉल) अवलोकनं विधास्यति। एतदतिरिच्य सः स्थानीयकार्यक्रमेषु अपि भागं ग्रहीष्यति सायं च शिवविहारे आयोजितायां शिवमहा-आरत्यां सम्मीलितः भविष्यति। ९ जून दिनाङ्के पूर्वराष्ट्रपतिः मनालीतः लाहौल-क्षेत्रं प्रति प्रयाणं करिष्यति तथा च 'अटल टनल' (सुरङ्गम्), चन्द्रभागानदीक्षेत्रं, 'सिस्सू' इत्येतानि समाहितं कृत्वा विभिन्नानां दर्शनीयस्थलानां भ्रमणं विधास्यति। सायं सः पुनः मनालीं प्रत्यागमिष्यति। १० जून दिनाङ्के पूर्वराष्ट्रपतिः रामनाथकोविन्दः भुन्तर-विमानास्पदात् देहलीं प्रति उड्डयनं करिष्यति। अस्य प्रवासस्य दृष्ट्या कुल्लू-लाहौल-स्पीति-जनपदयोः सुरक्षाव्यवस्था सुदृढा विहिता अस्ति तथा च सम्बद्धविभागेभ्यः आवश्यकाः निर्देशाः प्रदापिताः सन्ति।



# शुक्र-बृहस्पति-चन्द्राणां गोचरेण निर्मिताः गजकेसरी-राजयोग-गजलक्ष्मीयोगाः



**डॉ. खुशेन्द्र देव चतुर्वेदी**
**सहायक प्राध्यापकः, ज्योतिषविभागः**
**महर्षि महेश योगी वैदिक विश्वविद्यालयः, करौंदी, कटनी (म.प्र.)**

शुक्रस्य कर्कराशौ गोचरः सहयोगं निर्माति। एषः योगः ज्योतिषे सर्वेषु द्वादश (12) राशिषु जीविकार्थिकस्थित्यै अत्यन्तं शुभः मन्यते। अस्मात् गोचरात् धनलाभः, जीवने सकारात्मकऊर्जा, मित्रद्वारा भाग्योदयश्च भविष्यति। अयं योगः अत्यन्तं महत्वपूर्णः मन्यते।

8 जून दिने सोमवासरे शुक्रः कर्कराशौ प्रवेशं करिष्यति। कर्कराशौ 2 जून दिने बृहस्पतिः पूर्वमेव विराजमानः अस्ति। शुक्रगुर्वोः युत्या गजलक्ष्मीयोगः निर्मास्यते। शुक्रः 8 जून तः 4 जुलाई पर्यन्तं कर्कराशौ एव स्थास्यति।

शुक्रस्य कर्कराशौ गोचरः भौतिकसुखसुविधानां समृद्धेः च कारकः मन्यते। चन्द्रस्य उपस्थित्या सह मिलित्वा निर्मितः अयं राजयोगः जनमानसे जीवने स्थिरतां सकारात्मकऊर्जायाः च संचारं करिष्यति। उच्चराशौ गुरोः आगमनात् "सुवर्णे सुगन्धः" इति स्थितिः भविष्यति।सुवर्णरजतताम्रखाद्यवस्तूनां विशेषतः सर्षपगोधूमादीनां मूल्यानि वर्धिष्यन्ते। नूतनशिक्षानीतेः कार्यं च वेगेन वर्धिष्यते।सर्वेषु द्वादश (12) राशिषु योगस्यास्य प्रभावः

### 1. मेषराशिः
शुक्रस्य गोचरः जीविकायां विशेषसफलतां पदप्रतिष्ठायां वृद्धिं च दास्यति। पवित्रं मनः धृत्वा पवित्रकार्याणि सम्पन्नानि भविष्यन्ति।

### 2. वृषराशिः
मनसि चिन्तितं कार्यं सिद्ध्यति, पुरातनानि कार्याणि च सम्पन्नानि भविष्यन्ति। आर्थिकस्थितिः परिवर्तिष्यते। भौतिकसुखेषु वृद्धियोगः अस्ति।

### 3. मिथुनराशिः
कार्यक्षेत्रे स्थिरताम् आगमिष्यति। लम्बितयोजनानां पूर्त्यै अवसरः प्राप्स्यते। स्वास्थ्यं समीचीनं भविष्यति। नवजनैः सह मिलित्वा नूतनयोजनाः निर्मातुं शक्यन्ते।

### 4. कर्कराशिः
भवतामेव राशौ निर्मितेन अनेन राजयोगेन सम्मानं वर्धिष्यते। जीवने सकारात्मकपरिवर्तनानि अनुभविष्यन्ते। आयक्षेत्रे वृद्धिः, नूतनकार्यप्राप्तिश्च सम्भवति।

### 5. सिंहराशिः
आर्थिकक्षेत्रे सावधानता आवश्यकी। कस्याश्चित् महिलायाः द्वारा अपमानस्य योगः भवितुमर्हति। जनमानसाय उत्तमविचारैः नवीनपूर्णव्यवहारैश्च उन्नतिः सम्भविष्यति।

### 6. कन्याराशिः
नवीनानां स्रोतोविकसितानां योगः अस्ति। व्यावसायिकनिवेशेन लाभस्य प्रबला सम्भावना वर्तते। नूतनभूसम्पत्तेः क्रयणस्य योगः भवितुमर्हति।

### 7. तुलाराशिः
कार्यक्षेत्रे अधिकारिणां सहयोगः प्राप्स्यते। जीविकायाम् उन्नतेः नूतनाः अवसराः प्राप्स्यन्ते। व्यापारिणां कृते समयः अनुकूलः भविष्यति।

### 8. वृश्चिकराशिः
भाग्यस्य सहयोगः प्राप्स्यते। चरित्रे व्यवहारे च पवित्रतायां सत्यां कठिनकार्येष्वपि सफलता प्राप्स्यते। आर्थिकस्थितिः दृढा भविष्यति।

### 9. धनुराशिः
परोपकारेण आर्थिकसन्तुलनं स्थास्यति, लाभयोगश्च भविष्यति। ज्येष्ठानाम् आशीर्वादेन कार्यक्षेत्रे प्रयत्नेषु सफलपरिणामाः प्राप्स्यन्ते।

### 10. मकरराशिः
पारिवारिकजीवने मधुरता वर्धिष्यते। व्यावसायिकक्षेत्रे मिलित्वा कार्यं क्रीयते चेत् लाभप्राप्तेः योगः अस्ति। पदोन्नतेः अपि योगाः भविष्यन्ति।

### 11. कुम्भराशिः
कार्यक्षेत्रे सत्यनिष्ठा वैचारिकी पवित्रता यदि न स्यात् तर्हि जीविकायां लघ्वीः समस्याः सम्मुखीकर्तव्याः भवेयुः। प्रेमसम्बन्धेषु वञ्चना सम्भवति।

### 12. मीनराशिः
प्रेमसम्बन्धानां आर्थिकविषयाणां च कृते समयः शुभः भविष्यति। रचनात्मककार्यैः संलग्नजनेभ्यः लाभप्राप्तेः योगः अस्ति। काचन नूतना कविता, कथा, लेखः, ग्रन्थः वा लेखनाय समयः अनुकूलः भविष्यति।




# नारकण्डाप्रवासे मुख्यमन्त्रिणः अनेकाः घोषणाः; निर्विरोधं निर्वाचिताय नगरपञ्चायताय ५० लक्षरूप्यकाणां पुरस्कारः



**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः रविवासरे शिमला-जनपदस्य 'हाटू माता' मन्दिरे विधिवत् पूजा-अर्चनां कृत्व प्रदेशवासीनां सुख-समृद्धये कल्याणाय च कामनामकरोत्। अस्मिन् अन्तराले तेन प्रदेशे धार्मिकपर्यटनस्य मार्गसम्पर्कसुविधानां च सुदृढीकरणाय अनेकाः प्रमुखाः घोषणाः कृताः। प्रसारमाध्यमैः (मीडिया) साकं सम्भाषणकाले मुख्यमन्त्रिणा प्रतिपादितं यत् हिमाचलप्रदेशः स्वकीयायै समृद्धायै देवसंस्कृत्यै विश्वस्मिन् प्रसिद्धः अस्ति तथा च राज्यसर्वकारः धार्मिकपर्यटनस्य प्रवर्धनाय निरन्तरं यतते। तेन संसूचितं यत् 'ढली-नारकण्डा-रामपुर' मार्गं चतुष्पथराजमार्गरूपेण (फोरलेन राजमार्ग) विकसितुं योजनायां कार्यं प्रचलति, तदर्थं च सर्वेक्षणकार्यं पूर्णं जातम् अस्ति।मुख्यमन्त्रिणा प्रकथितं यत् अस्यां परियोजनायां सुरङ्गनिर्माणाय (टनल) प्राथमिकता प्रदास्यते, येन भूस्खलनस्य (landslide) घटनाभिः जायमानां हानिं न्यूनीकर्तुं शक्ष्यते तथा च जनेभ्यः सुरक्षितं सुगमं च गतागतं उपलप्स्यते। तेन विज्ञापितं यत् राज्यसर्वकारः 'हाटू माता रज्जुमार्ग (रोपवे) परियोजनाम्' अपि प्राथमिकताधारेण अग्रे नयति। एषा परियोजना 'नाबार्ड' (NABARD) इत्यस्य अन्तर्गतं प्रस्ताविता अस्ति। मुख्यमन्त्रिणः अनुसारं रज्जुमार्गपरियोजनां धरातले आनेतुं वर्षत्रयात् चत्वारि वर्षाणां समयः भवितुं शक्नोति, किन्तु सर्वकारः अस्याः कार्यान्वयनार्थं कटिबद्धः वर्तते।

सुक्खू-महोदयेन उक्तं यत् हाटू-माता-मार्गस्य परिष्कारकार्यार्थम् अपि धनराशिः स्वीकृता अस्ति। मार्गस्य उच्चस्तरीयकरणसमये पर्यावरणसंरक्षणस्य विशेषं ध्यानं निधास्यते तथा च वृक्षाणां कर्तनं न्यूनतम् एव स्थास्यति। अनेन श्रद्धालुभ्यः पर्यटकेभ्यश्च उत्तमाः सुविधाः प्राप्स्यन्ति। मुख्यमन्त्रिणा निर्विरोधरूपेण निर्वाचिताय नारकण्डा-नगरपञ्चायताय ५० लक्षरूप्यकाणां (५० लाख) विशेष-अनुदानराशेः घोषणा अपि विहिता। अस्मिन् मङ्गलावसरे नवनिर्वाचितैः पञ्चायतीराजप्रतिनिधिभिः मुख्यमन्त्री सम्मानितः कृतः। तेन नारकण्डायां पादपरोपणं कृत्व पर्यावरणसंरक्षणस्य सन्देशः अपि प्रदत्तः।

अस्मिन् कार्यक्रमे विधायकः कुलदीपराठौरः, देहरा-विधायिका कमलेशठाकुरः, हिमाचलप्रदेशवनविकासनिगमस्य उपाध्यक्षः केहरसिंहखाची, हिमाचलप्रदेशराज्यसहकारीबैंकस्य अध्यक्षः देवेन्द्रश्यामः, उपायुक्तः अनुपमकश्यपः, आरक्षाधीक्षकः (SP) गौरवसिंहः अन्ये च गण्याः उपस्थिताः आसन्।

# ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया॥

**सन्दर्भः:** अस्मिन् श्लोके भगवान् श्रीकृष्णः अर्जुनं प्रति कथयति यत् परमेश्वरः कुत्र वसति, सः च कथं सम्पूर्णं जगत् सञ्चालयति।

**व्याख्याः**-सर्वप्रथमं भगवान् स्पष्टयति यत् ईश्वरः कस्यापि दूरस्थे लोके (आकाशे वा) न वसति, अपितु सः 'सर्वभूतानां हृद्देशे तिष्ठति' अर्थात् संसारस्य प्रत्येकं प्राणिनः (मनुष्य-पशु-पक्षि-कीटादीनां) अन्तःकरणे, बुद्धौ वा साक्षिरूपेण शाश्वततया विराजमानः अस्ति। सः सर्वव्यापी अन्तर्यामी अस्ति। ततः परं तस्य कार्यपद्धतिं वर्णयन् श्रीकृष्णः कथयति यत् यथा कश्चित् सूत्रधारः (Puppeteer) काष्ठपुत्तलिकाः यन्त्रे संस्थाप्य स्वइच्छानुसारं भ्रमयति-नर्तयति वा, तथैव सः परमेश्वरः अपि 'मायया यन्त्रारूढानि सर्वभूतानि भ्रामयन्' अस्ति। अत्र जीवात्मा येन शरीरेण सह तादात्म्यं स्थापयति, तत् 'शरीरम्' एकं भौतिकं यन्त्रम् (Machine) अस्ति। परमात्मा स्वस्य 'मायया' (प्रकृतिशक्त्या) तानि शरीररूपी यन्त्रे स्थितानि भूतानि (जीवान्) पूर्वकृत-कर्मसंस्कारानुसारं संसारे भ्रमयति। जीवाः स्वप्रकृत्या वशीभूताः सन्तः कर्म कुर्वन्ति, ईश्वरः च सर्वसाक्षी भूत्वा तान् प्रेरयति।